# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2019**

**FIRST YEAR [BATCH 2018-21]**

Date : 24/05/2019 **SANSKRIT (General)**

Time : 11 am – 2 pm **Paper : II** Full Marks : 75

1. **<u>एक:</u>** प्रश्न: समाधेय:। [1×10]

   क) स्वप्नवासवदत्तनाटकस्य नामकरणस्य सार्थक्यं प्रतिपादनीयम्।

   ख) स्वप्नवासवदत्तनाटकस्य नायक उदयनो वा यौगन्धरायणो वेति यथायुक्ति निर्णेयम्।

   ग) स्वप्नवासवदत्तनाटकमवलम्ब्य वासवदत्ताचरित्रचित्रणं कार्यम्।

2. वङ्गभाषया आङ्गलभाषया वा पद्य**<u>स्यैकस्य</u>** अनुवाद: करणीय:। [1×5]

   क) पूर्वं त्वयाप्यभिमतं गतमेवमासी–
   च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तु:।
   कालक्रमेण जगत: परिवर्तमाना
   चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्ति:।

   ख) श्लाघ्यामवन्तिनृपते: सदृशीं तनूजां
   कालक्रमेण पुनरागतदारभार:।
   लावाणके हुतवहेन हताङ्गयष्टिं
   तां पद्मिनीं हिमहतामिव चिन्तयामि।।

   ग) अनाहारे तुल्य: प्रततरुदितक्षामवदन:
   शरीरे संस्कारं नृपतिसमदु:खं परिवहन्।
   दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
   नृप: प्राणान् सद्यस्त्यजति यदि तस्याप्युपरम:।।

3. सप्रसङ्गं व्याख्यायतां पद्य**<u>मेकम्</u>**। [1×6]

   क) दु:खं त्यक्तुं बद्धमूलोऽनुराग:
   स्मृत्वा स्मृत्वा याति दु:खं नवत्वम्।
   यात्रा त्वेषा यद् विमुच्येह बाष्पं
   प्राप्तानृण्या याति बुद्धि: प्रसादम्।।

   ख) प्रद्वेषो बहुमानो वा सङ्कल्पादेव जायते।
   भर्तुर्दाराभिलाषित्वादस्यां मे महती स्वता।।

   ग) क: कं शक्तो रक्षितुं मृत्युकाले
   रज्जुच्छेदे के घटं धारयन्ति।
   एवं लोकस्तुल्यधर्मो वनानां
   काले काले छिद्यते रुह्यते च।।

4. प्रश्न**<u>द्वयस्य</u>** संक्षिप्तमुत्तरं लेख्यम्। [2×2]

   क) 'एवमनिर्ज्ञातानि दैवतान्यप्यवधूयन्ते' इति कं जनमुद्दिश्य केन जनेन कथितमिदम्?

   ख) कौतुकमालिकारचनाकाले वासवदत्ता किमौषधं त्यक्तवती? कस्माद्धेतो:?

   ग) स्वप्नवासवदत्तनाटकस्य स्थापना केन कृता? भरतवाक्यं च केन पठितम्?

घ) 'तपोवनानि नामातिथिजनस्य स्वगेहम्' इति कं जनमुद्दिश्य केन जनेन कथितमिदम्?

ङ) 'स खलु गुणवान् नाम राजा य आगन्तुकेनाप्यनेनैवं प्रशस्यते' इत्यत्र कोऽयं राजा? कश्चागन्तुकः?

5. **एकः** प्रश्नः समाधेयः। [1×10]

क) रघुवंशमाश्रित्य वशिष्ठाश्रमे वशिष्ठदिलीपयोः कथोपकथनम् उपन्यस्यताम्।

ख) '...रघूणामन्वयं वक्ष्ये'- महाकविकालिदासः कीदृशरघूणामन्वयं वक्तुकाम आसीत्?

6. वङ्गभाषया आङ्गलभाषया वा पद्य**स्यैकस्य** अनुवादः करणीयः। [1×6]

क) दुदोह गां स यज्ञाय शस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।

ख) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।

ग) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

7. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×8]

क) हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।

ख) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

ग) तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।

8. प्रश्नत्र**यस्य** संक्षिप्तमुत्तरं लेख्यम्। [3×2]

क) 'जगतः पितरौ वन्दे' इत्यत्र कौ तावज् जगतः पितरौ?

ख) महीक्षितामाद्यः क आसीत्? स च महाकविना केन उपमितः?

ग) रघुवंशस्य प्रसिद्धटीकाकारस्य तथा तदीयटीकाया नाम लिख्यताम्।

घ) 'सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्' – कौ द्वौ किञ्च भुवनद्वयं दधतुः?

ङ) 'तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः' इत्यत्र कोऽयं गुरुः? का च गुरुपत्नी?

च) सुरभिशापवाक्यं राज्ञा तत्सारथिना वा कस्माद्धेतोर्न श्रुतम्?

9. पद**पञ्चके** सव्यासवाक्यं समासो निर्णेयः। [5×2]

क) अधिहरि | ख) अहिनकुलम्
ग) रामलक्ष्मणौ | घ) अधीतविस्मृतः
ङ) दुग्धधवलः | च) रामकृष्णः
छ) युवजानिः | ज) त्रिलोकम्
झ) विद्यामन्दिरम् | ञ) नामान्तरम्

10. **षण्णां** परिणतरूपाणि लेख्यानि। [6×1]

क) √लभ् + शानच् | ख) वि–√हा + ल्यप्
ग) दशरथ + अण् | घ) √यज् + क्त्वा
ङ) धन + मतुप् | च) हिरण्य + मयट्

| | |
|---|---|
| छ) √कृ + ल्युट् | ज) √हन् + शतृ |
| झ) √पच् + क्त | ञ) जन + तल् |
| ट) √पठ् + तुमुन् | ठ) घट + त्व |

11. वाक्यरचनया <u>**युगलद्वयस्या**</u>र्थगतं पार्थक्यं प्रदर्शनीयम्। [2×2]

| | |
|---|---|
| क) आम्रः, आम्रम् | ख) साधुः, साधु |
| ग) अर्थी, अर्थवान् | घ) सञ्चरते, सञ्चरति |

——— × ———